अरण्यं तेन गन्तव्यं यथारण्यं तथा गृहम् ॥
दैवेनापहृता यस्य पतिसाध्वी पतिव्रता ।
अरण्यं तेन गन्तव्यं यथारण्यं तथा गृहम् ॥
यस्य माता गृहे नास्ति भार्य्या चाप्रियवादिनी ।
अरण्यं तेन गन्तव्यं यथारण्यं तथा गृहम् ॥
प्रियाशून्यं गृहं यस्य पूर्णं स्त्रीधनबन्धुभिः ।
अरण्यं तेन गन्तव्यं यथारण्यं तथा गृहम् ॥
भार्य्याशून्या वनसमाः सभार्य्याश्च गृहा गृहाः ।
गृहिणी च गृहं प्रोक्तं न गृहं गृहमुच्यते ॥
अशुचिः स्त्रीविहीनश्च दैवे पैत्रे च कर्म्मणि ।
यदह्ना कुरुते कर्म्म न तस्य फलभाग्भवेत् ॥
दाहिकाशक्तिहीनश्च यथा मन्दो हुताशनः ।
प्रभाहीनो यथा सूर्य्यः शोभाहीनो यथा शशी ।
शक्तिहीनो यथा जीवो यथात्मा च तनूं विना ।
विनाधारं यथा धेयो यथेशः प्रकृतिं विना ॥
न च शक्तो यथा यज्ञः फलदो दक्षिणां विना ।
कर्म्मिणे च फलं दातुं सामग्रीम्फलमेव च ॥
विना स्वर्णं स्वर्णकारो यथाशक्तः स्वकर्म्मणि ।
यथाशक्तः कुलालश्च मृत्तिकाञ्चनविना द्विजाः ॥
तथा गृही न शक्तश्च सततं सर्व्वकर्म्मणि ।
भार्य्यामूलाश्च पुत्राश्च भार्य्यामूला गृहास्तथा ॥
भार्य्यामूलं सुखं शश्वद्गृहस्थानां गृहे सदा ।
भार्य्यामूलः सदा हर्षो भार्य्यामूलश्च मङ्गलम् ॥
भार्य्यामूलश्च संसारो भार्य्यामूलश्च सौरतम् ।
यथा रथश्च रथिनां गृहिणाश्च तथा गृहम् ।
सारथिस्तु यथा तेषां गृहस्थानां तथा प्रिया ॥
सर्व्वरत्नप्रधानश्च स्त्रीरत्नं दुष्कुलादपि ।
सा गृहीता गृहस्थेनेत्याह कमलोद्भवः ॥
यथा जलं विना पद्मं पद्मं शोभां विना यथा ।
तथैव च गृहं शश्वद्गृहिणीं गृहिणीं विना ॥"

इति ब्रह्मवैवर्त्ते प्रकृतिखण्डे ५६ अध्यायः ॥

तस्या अत्याज्यत्वं यथा,—
"अनपत्याञ्च युवतीं कुलजाञ्च पतिव्रताम् ।
त्यक्त्वा भवेद्दूयः सन्न्यासी ब्रह्मचारी यतीति वा ॥
वाणिज्ये वा प्रवासे वा चिरं दूरं प्रयाति यः ।
तीर्थाय तपसे वापि मोक्षार्थं जन्म खण्डितुम् ॥
न मोक्षस्तस्य भवति धर्म्मस्य स्खलनं ध्रुवम् ।
अभिशापेन भार्य्याया नरकञ्च परत्र च ॥
इहैव च यशोनाश इत्याह कमलोद्भवः ॥"

इति ब्रह्मवैवर्त्ते श्रीकृष्णजन्मखण्डे ११२ अः ॥

बहुभार्य्यस्यैकस्या भजने दोषादि यथा,—
"गदतो यत् श्रुतं पूर्ब्बं नारदाय पितुर्मुखे ।
दक्षस्य धर्म्मशास्त्रार्थं तत् शृणुष्व निशापते ! ॥
बहुदारः पुमान् यस्तु रागादेकां भजेत् स्त्रियम् ।
स पापभाक् स्त्रीजितश्च तस्याशौचं सनातनम् ॥
यद्दुःखं जायते स्त्रीणां स्वाम्यसम्भोगजं यथा ।
न तस्य सदृशं दुःखं किञ्चिदन्यद्धि विद्यते ॥
सतीमृतुमतीं जायां यो नेयात् पुरुषाधमः ।
ऋतुचसेषु मृहेषु भ्रूणहा स हि जायते ॥
भार्य्या स्याद्यावदात्रेयी तावत् कालं विरोधकम् ।
तस्यास्तु सङ्गमे किञ्चित् विहितञ्चापि नाचरेत् ॥
बहुभार्य्यस्य भार्य्यासामृतुमैथुनमाशनम् ।
न किञ्चिद्विद्यते कर्म्म शास्त्रेणापि यदीरितम् ॥
तोषयेत् सततं भार्य्यां विधिवत् पाणिपीड़िताः ।
तासां तुष्ट्या तु कल्याणमकल्याणमतोऽन्यथा ॥
सन्तुष्टो भार्य्यया भर्त्ता भर्त्रा भार्य्या तथैव च ।
यस्मिन्नेतत्कुले नित्यं कल्याणं तत्र वै ध्रुवम् ॥
यया विरुध्यते स्वामी सौभाग्यमदहमया ।
सपत्नीसङ्गमं कर्त्तुं सा स्यादेश्या भवान्तरे ॥
इहापि लोके वाच्यत्वमधर्म्मञ्चापि विन्दति ।
न च पितृकुलं स्वामिकुलं तस्याः प्रमोदते ॥
विरुध्यमाने पत्यौ यत् सपत्न्या वा प्रवर्त्तिते ।
अतीव दुःखं भवति तदकल्याणतत्त्वयोः ॥"

इति कालिकापुराणे २० अध्यायः ॥

रजस्वला भार्य्या अत्याज्या । यथा,—
"न घिनोतीह यो दारान् रजसा कलुषीकृतः ।
पितरस्तस्य तन्मासं तस्मिन् रजसि शेरते ॥"
श्रीतपैश्चाग्नहते कुक्षे रेतसाञ्च पिबत्यसौ ॥
यो जहाति रजः कृत्वा पिशाचं स्वं तेजसा नरः ।
सोऽश्नाति फलमप्येवं यो न दद्याहतुं पुनः ॥
यो बिभर्त्ति स मत्तो वै बहूनां रजसि स्थितः ।
रेतः पिबति तन्मासो पितृभ्यो योऽप्यपिण्डदः ॥
यो जहाति हि निर्द्दोषां भार्य्याञ्चैव रजस्वलाम् ।
शुद्धिमान् संहतः कृतगर्भस्य दुरितं वहेत् ॥"

इति वह्निपुराणम् ॥

कालविशेषे तद्गमननिषेधो यथा,—
"न दिवापि स्त्रियं गच्छेत् कदाचिदिच्छयापि च ।
न पर्व्वसु न सन्ध्यासु नाद्यर्त्तुचतूरात्रिषु ॥
नोदक्यां न दिवा गच्छेत् न सगर्भां न व्रतस्थिताम् ।
अभिगच्छेदविद्वान् यस्तदायुःक्षयमेव च ॥
वन्ध्याष्टमे परित्याज्या नवमे च मृतप्रजा ।
एकादशे स्त्रीजननी सद्यस्त्वप्रियवादिनी ॥
न वक्रेऽभिगमं कुर्य्यात् पाणिग्राही तु योषितः ।
कुर्य्याच्चेत् पितरस्तस्य पतन्ति रेतसोऽशुचः ॥
भार्य्याधीनं सुखं पुंसां भार्य्याधीनो धनागमः ।
भार्य्याधीना मखोत्पत्तिर्भार्य्याधीनः सुखोदयः ॥
यत्र भार्य्या गृहं तत्र भार्य्याधीनो गृहे वसेत् ।
न गृहेण गृहस्थः स्यात् भार्य्यया कथ्यते गृही ॥"

इति पराशरस्मृतिः ॥

भार्य्याटः, पुं, (भार्य्यया अटति वर्त्तते इति । अट गतौ + पचाद्यच् ।) अन्यार्थं स्वस्त्रीदाता । इति त्रिकाण्डशेषः ॥

भार्य्याटिकः, पुं, (अट गतौ + भावे घञ् । भार्य्यया आटो गतिर्भ्रमणं वा अस्यास्येति । भार्य्याट + ठन् ।) स्त्रीजितः । हरिणविशेषः । इति मेदिनी । के, २०५ ॥ (मुनिविशेषः । इति हेमचन्द्रः ॥)

भार्य्यापती, पुं, (भार्य्या च पतिश्च तौ । "राजदन्तादिषु परम् ।" २।२।३१। इति साधुः ।) योषित्पती । नित्यद्विवचनान्तोऽयं शब्दः । तत्पर्य्यायः । दम्पती २ जम्पती ३ जायापती ४ । इत्यमरः । २ । ६ । ३८ ॥

भार्य्यारुः, पुं, (भार्य्यां ऋच्छतीति । ऋ गतौ + उण् ।) मृगभेदः । क्रीड़या परभार्य्यायां पुत्रोत्पादकः । शैलभेदः । इति मेदिनी । रे, १६२ ॥

भार्य्यावृक्षः, पुं, (भार्य्यावत् प्रियो वृक्षः ।) पतङ्गवृक्षः । इति राजनिर्घण्टः ॥

भालं, क्ली, (भाम दीप्तौ + भावे क्विप् । भां लाति गृह्णातीति । ला + "आतोऽनुपसर्गे कः ।" ३ । २ । ३ । इति कः ।) भ्रुवोरूर्द्धभागः । कपाल इति भाषा । तत्पर्य्यायः । ललाटम् २ अलिकम् ३ गोधि ४ । इति राजनिर्घण्टः ॥ (यथा, साहित्यदर्पणे ३ परिच्छेदे ।
"स्वामिन् भङ्गुरयालकं सतिलकं भालं विलासिन् कुरु
प्राणेश ! त्रुटितं पयोधरतटे हारं पुनर्योजय ॥")
तेजः । इति मेदिनी । ले, ४२ ॥

भालदर्शनं, क्ली, (भाले ललाटे दर्शनमस्येति ।) सिन्दूरम् । इति शब्दचन्द्रिका ॥

भालदृक्, [श्] पुं, (भाले ललाटे दृक् नेत्रं यस्य ।) शिवः । इति हेमचन्द्रः । २ । ११० ॥

भालाङ्कः, पुं, (भालस्येव अङ्को यस्य भाले अङ्को यस्येति वा ।) करपत्रम् । शाकभेदः । रोहितमत्स्यः । महालक्षणसम्पन्नपुरुषः । कच्छपः । हरः । इति मेदिनी । के, १३२ ॥ (भालस्य अङ्कः ।) ललाटचिह्नञ्च ॥

भाललोचनः, पुं, (भाले ललाटे लोचनं नेत्रं यस्य ।) शिवः । इति भालदृक्शब्ददर्शनात् ॥ (यथा, काशीखण्डे । २६ । १३० ।
"भाललोचनभावज्ञा भूतभव्यभवत्प्रभुः ॥")

भालुकः, पुं, (भलते हिनस्ति प्राणिनः इति । भल हिंसायाम् + बाहुलकात् उकः । ततः प्रज्ञाद्यण् ।) भल्लूकः । यथा, भरतधृतकोषान्तरे ।
"भालूको भालुको भल्लोऽच्छभल्लोऽच्छोऽपि भल्लुकः ॥"

भालूकः, पुं, (भलते हिनस्ति जीवानिति । भल + "उलूकादयश्च ।" उणा० । ४ । ४१ । इति ऊकः । ततः प्रज्ञाद्यण् ।) भल्लूकः । यथा,—
"भालूको भालुको भल्लोऽच्छभल्लोऽच्छोऽपि भल्लूकः ॥"

इति भरतधृतकोषान्तरम् ॥

भाल्लुकः, पुं, भल्लूकः । इत्यमरटीकायां भरतः ॥

भाल्लूकः, पुं, भल्लूकः । इत्यमरटीकायां भरतः ॥

भावः, पुं, (भावयति चिन्तयति पदार्थानिति । भू + णिच् + पचाद्यच् । भवतीति । भू + "भवतेश्चेति वक्तव्यम् ।" इति काशिकोक्तेर्णो वा ।) नाम्योक्तौ विद्वान् । मानसविकारः । सत्ता । (यथा, श्रीमद्भगवद्गीतायाम् । २ । १६ ।
"नासतो विद्यते भावो नाभावो विद्यते सतः ।
उभयोरपि दृष्टोऽन्तस्त्वनयोस्तत्त्वदर्शिभिः ॥")
स्वभावः । अभिप्रायः । (यथा, रामायणे । २ । २ । १६ ।